KENDRIYA VIDYALAYA SANGATHAN , BHUBANESWAR REGION

PRE-BOARD EXAMINATION (2025-26)

SET-2

CLASS -X

SUBJECT- COMMUNICATIVE SANSKRIT (Code -119)

MAX. MARKS = 80 **MAX.TIME ALLOWED = 03 HOURS**

सामान्यनिर्देशाः -

1. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 08 पृष्ठानि मुद्रितानि सन्ति ।
2. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 18 प्रश्नाः सन्ति ।
3. अस्मिन् प्रश्नपत्रे चत्वारः भागाः सन्ति-

'क' भागः : अपठितावबोधनम् 10 अङ्काः
'ख' भागः : रचनात्मककार्यम् 15 अङ्काः
'ग' भागः : अनुप्रयुक्तव्याकरणम् 25 अङ्काः
'घ' भागः : पठितावबोधनम् 30 अङ्काः

4. प्रत्येकं भागम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि ।
5. उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः ।
6. प्रश्नस्य क्रमाङ्कः प्रश्नपत्रानुसारम् एव लेखनीयः ।
7. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि ।
8. प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः ।

'क' भागः अपठित –अवबोधनम् 10 अङ्काः

1. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत - **10**

समाजे सज्जनाः तथैव दुर्जनाः अपि वर्तन्ते। सज्जनानां संगतिः सत्सङ्गतिः दुर्जनानां संगतिश्च कुसंगतिः भवति। सामाजिकः प्राणी संगतिं विना स्थातुं न शक्नोति। अतः मनुष्याय संगतिः अनिवार्या एव। सत्सङ्गत्या मनुष्यः सदैव उन्नतिं करोति कुसङ्गत्या तु सः पतनमार्गे नूनं पतति। गुणं विना कोऽपि मानवः सन्मानवः न भवति। सत्संगेन सज्जनः सन्मार्गम् अनुसरति । सत्संगस्य प्रभावेन मनुष्येषु शनैः शनैः गुणाः - बहिः निर्गच्छन्ति। संगस्य प्रभावः सर्वत्र दृश्यते। उक्तञ्च, " कोटोऽपि सुमनः संगात् आरोहति सतां शिरः" । सत्संगत्या मनुष्यः समाजे मानं प्राप्नोति किन्तु कुसंगतौ पतित्वा तु मनुष्यः अपयशः निन्दाम् अपमानमेव प्राप्नोति । अतः सर्वदा सत्संगतौ एव वक्तव्यम्।

(I) एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्) **1X2=2**

(क) केषां संगतिः सत्संगतिः भवति ?

(ख) संगतिः कस्मै अनिवार्या एव अस्ति ?

(ग) कुत्र सज्जनाः दुर्जनाः च वर्तन्ते? **2X2=4**

(II) पूर्णवाक्येन उत्तरत (केवलं प्रश्नद्वयम्)

(क) सत्संगेन मनुष्यः किं किं करोति?

(ख) कुसंगतौ पतित्वा मनुष्यः किं प्राप्नोति ?

(ग) कया मनुष्यः पतनमार्गे नूनं पतति?

(III) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत । **1**


(IV) भाषिककार्यम्- **1X3=3**

(क) 'आरोहति' इति क्रियापदस्य कर्तृपदं गद्यांशात् चित्वा लिखत्?

(i) संगतम् (ii) अनुसरणम् (iii) सुमन (iv) कीटः

(ख) 'कुमार्गम्' इत्यस्य विलोमपदं चित्वा लिखत?

(i) सन्मार्गम् (ii) न्यूनतम (iii) वस्तव्यम् (iv) सत्संगतिः

	(ग) 'प्राणी' इति पदस्य विशेषणपदं किम् ? (i) सामाजिकः (ii) अबलाः (ii) दुर्जनः (iv) मनुष्याः	
	'ख' भाग: रचनात्मकम् –कार्यम् **15 अङ्काः**	
2.	**भवान् रितेशः। 'पर्यावरणस्य रक्षायै किं किं करणीयम्' इति वर्णयन् स्वमित्रं प्रति लिखिते पत्रे मञ्जूषातः पदानि चित्वा रिक्तस्थानानि पूरयित्वा पत्रं पुनः लिखत ।** जगन्नाथविहार (i)..... तिथिः **.....11. 2025** प्रिय मित्र नमन ! (ii)..... अद्य एव मम विद्यालये पर्यावरणदिवसः मानितः। तत्र (iii)..... रक्षायै किं करणीयम् इति अस्मिन् विषये चर्चा अभवत् । केचन उपायाः अतीव सरलाः सन्ति यान् वयं सर्वे (iv)..... समर्थाः । यथा गृहस्य प्राङ्गणे पुष्पपादपाः (v)..... अभिरक्षणीयाः च । तैलरहितानां वाहनानां प्रयोगः कर्तव्यः । अवकरः (vi)..... न प्रक्षेपणीयः। जलं दूषितं न करणीयम् अपितु प्रयत्नेन तस्य (vii)..... कर्तव्यम् । ध्वनिप्रदूषणम् अपि न कर्तव्यम्। यदि वयं सर्वे मिलित्वा पर्यावरण रक्षायै प्रयत्नं करिष्यामः तर्हि इदं (viii)..... जीवनाय उपयुक्तं सुखकरं च भविष्यति। आशासे भवान् अपि पर्यावरणरक्षायै उद्यतः भविष्यति । गृहे (ix) .....मम प्रणामाः। अनुजाय नेहराशिः । भवदीय मित्रम् (x)..... **(मञ्जूषा - जगत्, रितेशः, रोपणीयाः, सप्रेम नमः, कर्तुम्, भुवनेश्वरतः, मातृपितृचरणेषु, इतस्ततः, संरक्षणम्, पर्यावरणस्य)**	$^{1}/_{2}$X10=5
3.अ.	**प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्चवाक्यानि संस्कृतेन लिखत-**  **चायविक्रेता, बालकः, जनः, तिष्ठति, वृक्षाः, समाचारपत्रम्, पठति, विक्रीणीते, चल-आपणः, सुपिष्टकानि, अवकरपात्रम् ।**	1X5=5

अथवा

आ. **मञ्जूषायां प्रदत्त-शब्दानां साहाय्येन निम्नलिखितं विषयम् अधिकृत्य पञ्चभिः संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत ।**

"जलस्य महत्त्वम् "

मञ्जूषा

जलम्, क्षेत्राणाम्, विना, जीवने, स्नानाय, भोजनस्य, अस्माभिः, महत्त्वपूर्णम्, कर्तुम्, क्षालनाय, दूषितेन, जायन्ते।

4.अ. **अधोलिखितां कथां मञ्जूषायाः शब्दसहायतया पूरयित्वा पुनः लिखत-** **$^{1}/_{2}$X10=5**

एकदा एकस्मिन् i)..... कश्चन वृद्धः वनमार्गात् अगच्छत्। यदा सः मार्गे श्रान्तः तदा एकस्य ii)..... अधः छायायां उपविष्टः अभवत्। तस्मिन् वृक्षे बहूनि फलानि बहवः iii)..... च अभवन्। सः यद्यपि वृक्षम् आरुह्य फलं स्वीकर्तुं iv)..... तथापि वानरेभ्यः भयात् आरोहणं न कृतवान् । अतः सः तानि फलानि स्वीकर्तुम् एकम् v) .....अचिन्तयत् । यत्र वृद्धः उपविष्टः vi) ..... शिलाखण्डाः अभवन्। वृद्धः अचिन्तयत्-यदि अहं शिलाखण्डः वानरान् ताडयामि vii)..... वानराः अपि फलानि उपयुज्य मां ताडयिष्यन्ति इति । ततःviii)..... वानरान् अताडयत् । यथा वृद्धः वानरान् अताडयत् तथा एव क्रुद्धाः वानराः अपि वृक्षस्य ix) ..... वृद्धम् अताडयन् । तानि फलानि स्वीकृत्य वृद्धः x) ..... भूत्वा अगच्छत् ।

मञ्जूषा-(समर्थः /ग्रामे/सन्तुष्टः/तर्हि/वृक्षस्य/वानराः/उपायम् / तत्र/ शिलाखण्डैः/ फलैः)

अथवा

आ. **मञ्जूषायां प्रदत्तपदैः रिक्तस्थानानि पूरयित्वा अधोलिखित-संवादं पुनः लिखत –** **1X5=5**

रमेशः- सुरेशः !भवान् कुत्र गच्छति?
सुरेशः- (i).....।
रमेशः- कः विशेषः अस्ति? किं परीक्षायाः परिणामः आगतः ।
सुरेशः- अहं परीक्षायाम् उत्तीर्णः जातः ।
रमेशः –(ii).....।
सुरेशः- गुरूणां मार्गदर्शनेन महान् लाभः अस्ति । सत्यम् । परिश्रमः च आवश्यकः ।
रमेशः –(iii).....?
सुरेशः- गणितस्य अध्ययनं कठिनं भवति । परं अति रोचकं भवति
रमेशः –(iv)..... ?
सुरेशः- संस्कृतस्य विषयः सरलः भवति ।
रमेशः –(v).....।

मञ्जूषा-
♦ अहं अपि परीक्षायाम् उत्तीर्णः एव अस्मि ।
♦ कस्य विषयस्य अध्ययनं कठिनं भवति ?
♦ साधु उक्तम् ।
♦ अहं विद्यालयं गच्छामि ।
♦ कस्य विषयः सरलः अस्ति ?

	'ग' भाग: अनुप्रयुक्त-व्याकरणम् 25 अङ्का:	
5.	**अधोलिखित- वाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिविच्छेदं वा कुरुत-** (i) राज्ञः स्वेषु **गात्रेष्वपि** निरासक्तिं विज्ञाय ब्रह्माण्डं व्याकुलं सञ्जातम् । (ii) हे राजर्षे **! यत् + इच्छसि** तदुच्यताम् ! (iii) त्वं अद्य **वध्योऽसि** माया । (iv) द्वादशसमा: **पर्जन्यस्तद्** राष्ट्रं न अभिवर्षाति **अथवा** **अधोलिखित- वाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिविच्छेदं वा कुरुत-** (i) सुपकाराणाम् मेषेण **सह + एष** कलह: नूनं विनाशकरणम् । (ii) भर्त: ! **काकात् + अन्य:** कः भवितुम अर्हति । (iii) मनसः निग्रहम् अहं **वायोः+ इव** सुदुष्करं मन्ये। (iv) भीमः द्रौपदी **युधिष्ठिरश्च** रणभूमौ प्रविशन्ति।	**1X4=4**
6.	**अधोलिखित- वाक्येषु रेखाङ्कितपदानां समस्तपदं विग्रहं वा प्रदत्तविकल्पेभ्य: चित्वा लिखत –** (i) **परद्रव्ये** अनासक्ता सा न्यवेदयत् । (क) परे द्रव्ये (ख) परं द्रव्ये (ग) परेषाम् द्रव्ये (घ) पर द्रव्ये (ii) वाचि **अवक्रता** भवेत् । (क) अ वक्रता (ख) न वक्रता (ग) अन वक्रता (घ) अव वक्रता (iii) ततः **व्यास: च नारद: च** प्रविशतः । (क) व्यासनारद: (ख) व्यासनारदयोः (ग) व्यासनारदम् (घ) व्यासनारदौ (iv) प्रच्छन्नभाग्य: **सकरुणम्** उचै: आक्रन्दत् । (क) करुणेन सह (ख) करुणया सह (ग) सकरुणेन सह (घ) सकरुणम् सह	**1X4=4**
7.	**अधोलिखित-वाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्य: चित्वा लिखत - (केवलं प्रश्नचतुष्टयम्)** (i) यथा **अवक्रता** चित्ते तथा वाचि भवेत् । (क) अवक्र + ता (ख) अवक्र + तल् (ग) अ + वक्रता (घ) अवक्रत + टाप् (ii) कथं एतौ **नि + वृ +अनीयर** । (क) निवारणीय: (ख) निवारणीया (ग) निवारणीयौ (घ) निवारणीयम् (iii) पञ्चशतानां बौद्धभिक्षूणां **निवासयोग्या** स्थली इयम्। (क) निवासयोग +टाप् (ख) निवासयोग +अनीय (ग) निवासयोग +ङीप् (घ) निवासयोग्य+टाप् (iv) लोके विद्वांसः एव **चक्षुष्मन्तः** प्रकीर्तिताः। (क) चक्षुष् + मतुप् (ख) चक्षुष् + मन्तः (ग) चक्षुष् + मान् **(घ)** चक्षु: + ठक	**1X4=4**

8.	**वाच्यानुसारं मञ्जूषाप्रदतै: उचितपदै: रिक्तस्थानानि पूरयित्वा अधोलिखितं संवादं पुन: लिखत –** **अर्चिता –** वर्षे ! त्वं किम् पठसि ? **वर्षा –** अर्चिते ! (ii) ..... गीता पठ्यते । **अर्चिता -** त्वं कान् (ii)..... गायसि ? **वर्षा -** मया गीताश्लोकाः गीयन्ते। त्वया अधुना किं (iii)..... ? **अर्चिता -** अहं नीतिश्लोकान् गायामि । **मञ्जूषा- (श्लोकान्, गीयते, मया)** **अथवा** **वाच्यानुसारम् उचितपदैः रिक्तस्थानानि पूरयित्वा वाक्यानि पुनः लिखत - 3x1=3** (i) ..... ब्रम्हास्त्रम् विमुच्यते । (द्रोणपुत्र) (ii) विचक्षणै: ..... संभाष्यन्ते ।(रिपु) (iii) अहं भवते चक्षुर्द्वयम ..... ।(प्र-यच्छ)	**1X3=3**
9.	**कालबोधकशब्दै: अधोलिखित-दिनचर्यां पूरयत –** (i) विद्यालये . ..... (7.15)वादने प्रार्थनासभा भवति । (ii) संस्कृतकक्षा ..... .(8.45) वादने भवति । (iii) धन्वन्तरिः ..... (10.00) वादने अल्पाहारं स्वीकरोति।	**1X3=3**
10.	**मञ्जूषायां प्रदत्तै: उचितै: अव्ययपदै: अधिलिखितवाक्येषु रिक्तस्थानानि पूरयित –** (i) विचित्रा ..... दैवगतिः । (ii) मेषो यावत् महानसं प्रविशति ..... सूपकारेण अर्धज्वलितकाष्ठेन ताडितः। (iii) राजहंस: हंसी .....विहरत: । (iv) सः तु एकाकी .....द्रोणपुत्राय अलम्। **मञ्जूषा- [**एव , तावत् ,च , खलु**]**	**1X4=4**
11.	**अधोलखित-वाक्येषु रेखाङ्कित-अशुद्धपदाय उचितम् उत्तरं विकल्पेभ्य: चित्वा लिखत -** (i) अद्य सोमवासर: **<u>आसीत्</u>** । (क) अस्मि (ख) आसन् (ग) अस्ति (घ) स्तः (ii) **<u>अश्वः</u>** प्राणत्राणाय इतस्ततः अधावन्। (क)अश्वा: (ख) अश्वाम् **(ग)** अश्व: (घ) अश्वेषु (iii) जानीमः वयं भवतः **<u>दिव्यं</u>** शक्तिम् । (क) दिव्याम् (ख) दिव्यान् (ग) दिव्यानि (घ) दिव्याः।	**1X3=3**
	'घ' भाग: पठित -अवबोधनम् 30 अङ्का:	
12.	**अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -** नाहं स्वर्गम् न मोक्षम् वा कामये किन्तु आर्तानां परित्राणाय एव मे निश्चयः। अस्य याञ्चा वृथा मा अस्तु। इत्युक्त्वा स राजा वैद्योक्तविधिना नीलोत्पलम् इव एकं चक्षुः शनैः अक्षतम् उत्पाट्य प्रीत्या याचकाय समर्पितवान्। सः अपि तत् नेत्रं यथास्थानम् अस्थापयत्। ततो महीपालः द्वितीय-नेत्रमपि शनैः निष्कास्य तस्मै अयच्छत् । अथ विस्मितः शक्रः अचिन्तयत्- अहो धृतिः ! अहो सत्त्वम् ! अहो सत्त्वहितैषिता ! नायं चिरं परिक्लेशम् अनुभवितुम् अर्हति। अतः प्रयतिष्ये चक्षुषोऽस्य पुनः प्रत्यारोपणाय	**5**

	इति। कतिपयैः दिनैः व्रणविरोपणे जाते एकदा राजा सरोवरस्य समीपे विहरति स्म। तदा तस्य पुरतः पुनः देवराजः शक्रः उपस्थितः भूत्वा तस्य त्यागवृत्तिं प्रशंसत् । **I. एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्)** (i) राजा नेत्रद्वयं कस्मै समर्पितवान् ? (ii) नेत्रोत्पाटनविधिः केन उक्तः ? (iii) एकदा राजा कुत्र विहरति स्म ? **II.पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम्)** (i) नृपः किम् निश्चयम् अकरोत् ? (ii) विस्मितः शक्रः किम् अचिन्तयत् ? (iii)शक्रः राज्ञः पुरतः उपस्थितः भूत्वा किम् अकरोत् ? **III.(क) निर्देशानुसारम् उत्तरत-** (i) राजा' इति शब्दस्य किं पर्यायवाचिपदम् अत्र प्रयुक्तम् ? (ii)'अस्य याञ्चा वृथा मा अस्तु' अत्र 'अस्य' इति पदं कस्मै प्रयुक्तम् ? **अथवा** **(ख) निर्देशानुसारम् उत्तरत-** (i) अत्र गद्यांशे "अभितः" इति अर्थे किं पदं प्रयुक्तम् ? (ii) 'कामये ' इति क्रियापदस्य कर्तृपदं किम् ?	**$^{1}/_{2}$X2=1** **1X2= 2** **1X2= 2**
13.	**अधोलिखितपद्ये पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -** त्यक्त्वा धर्मप्रदां वाचं परुषां योऽभ्युदीरयेत्। परित्यज्य फलं पक्वं भुङ्क्तेऽपक्वं विमूढधीः ॥ **I. एकपदेन उत्तरत । (केवलं प्रश्नद्वयम्)** (i) विमूढधीः कीदृशीं वाचं त्यजति? (ii) कः परुषां वाचं वदति? (iii) कः अपक्वम् फलं खादति? **II. पूर्णवाक्येन उत्तरत । (केवलं प्रश्नद्वयम्)** (i) कः विमूढधीः ? (ii) विमूढधीः कीदृशम् फलं भुङ्क्ते ? (iii)कः परुषां वाचं त्यजति ? **III. (क) निर्देशानुसारम् उत्तरत-** (i) 'कठोराम्' अस्य पर्यायः श्लोकात् एव चित्वा लिखत ? (ii) **"**त्यक्त्वा**"** इति अर्थे अत्र किं पदं प्रयुक्तम् ? **अथवा** **(ख) निर्देशानुसारम् उत्तरत-** (i) 'अपक्वं ' इति कस्य पदस्य विशेषणम् ? (ii) 'पक्वम्' इति पदस्य विलोमपदं किम्?	**5** **$^{1}/_{2}$X2=1** **1X2= 2** **1X2= 2**
14.	**अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -** **सुधाकरः** :- अरुणाचलप्रदेशस्य राजधानी का? **पर्यटनाधिकारी** :- 'ईटानगरम्' अस्य प्रदेशस्य राजधानी । **श्यामा** :- महोदय ! अत्रत्यजनजातीनां कानि प्रमुखानि आजीविका- साधनानि? **पर्यटनाधिकारी** :- कृषिः शिल्पकला वनसम्पद् चैव एतेषां प्रमुखानि आजीविकासाधनानि । **रविः** :- मान्यवर ! अस्य प्रदेशस्य प्रमुखाः उत्सवाः के? **पर्यटनाधिकारी** :- साधु पृष्टम्। अत्र अनेके प्रमुखोत्सवाः। 'वाङ्चो' जनजातीनां प्रमुखं पर्व 'ओरिया' इति अस्ति। एतत् तु 'फरवरी' इति मासे मान्यते। अस्मिन् अवसरे कृषिभूमिपूजनं सेतुनिर्माणं च	**5**

	सामाजिकं कार्यं क्रियते। 'मोपीन' इति अपि कृषिपर्व अस्ति। देवानामपि देवः 'मोपीन' इति कथ्यते। होली सदृशम् एव पर्व इदम्। जनाः परस्परं मुखे कपोले च शालिचूर्णं लिम्पन्ति। इदम् 'अप्रैल' इति मासे मान्यते। 'ओणम्' पर्वसमं 'साडकेन' एकम् अन्यत् पर्व अस्ति। लामासम्प्रदायस्य 'लोसर' इति प्रमुखं पर्व अपि 'फरवरी' इति मासे सम्पद्यते। **हिमांशुः :-** अस्माभिः 'मिथुन' इति विषये अपि किञ्चिद् श्रुतम्। किं तत्? **I. एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्)** (i) 'लोसर' कस्य प्रमुखपर्व ? (ii) कृषि भूमिपूजनम् कस्मिन् पर्वणि क्रियते ? (iii) 'ईटानगरम्' कस्य प्रदेशस्य राजधानी ? **II. पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम्)** (i) जनजातीनां प्रमुखानि आजीविका साधनानि कानि ? (ii) मोपीन कः ? (iii) केषां प्रमुखं पर्व 'ओरिया' ? **III.(क) निर्देशानुसारम् उत्तरत-** (i) 'प्रमुखं पर्व' इत्यनयोः पदयोः विशेषणपदं किम् ? (ii) 'लिम्पन्ति' इति क्रियायाः कर्तृपदं किम् ? **अथवा** **(ख) निर्देशानुसारम् उत्तरत-** (i) 'सामाजिकं कार्यं' इत्यनयोः पदयोः विशेष्यपदं किम् ? (ii) '**<u>वदने</u>**' इति पदस्य किं पर्यायपदं अत्र प्रयुक्तम् ?	**$^{1}/_{2}$X2=1** **1X2= 2** **1X2= 2**
15.	**रेखाङ्कित-पदानि आधृत्य प्रश्ननिर्माणं कुरुत – (केवलं प्रश्नपञ्चकम्)** (i) **<u>अनुद्वेगकरं</u>** वाक्यं वाङ्मयं तपः उच्यते। (ii) काकः प्रभाते का का ध्वनिना **<u>सुप्तान्</u>** प्रबोधयति । (iii) **<u>प्राज्ञः</u>** कलहायुक्तं गृहं दूरतः परिवर्जयेत् । (iv) **<u>वनौषधीनां</u>** तु अयं स्रोतः एव अस्ति । (v) धैर्यं **<u>आपदां</u>** तरणिः ।	**1X5=5**
16.	**मञ्जूषातः समुचितपदानि चित्वा अधोलिखित-श्लोकस्य अन्वयं पूरयित्वा पुनः लिखत –** अथ केन प्रयुक्तोऽयं पापं चरति पूरुषः । अनिच्छन्नपि वार्ष्णेयः बलादिव नियोजितः ॥ **अन्वयः** -वार्ष्णेयः ! अथ (i) .....पूरुषः केन (ii)..... अनिच्छन् अपि (iii)..... नियोजितः इव (iv)..... चरति । पापम्, अयम्, बलात्, प्रयुक्तः **अथवा** **य इच्छत्यात्मनः श्रेयः प्रभूतानि सुखानि च।** **न कुर्यादहितं कर्म स परेभ्यः कदापि च।।** **भावार्थः -** यदि कश्चित् (i)..... स्वस्य श्रेयः (ii)..... सुखानि च इच्छति तर्हि सः कदापि(iii).....अहितं कर्म न (iv).....। अन्येभ्यः, नरः, कुर्यात्, अनेकानि	**$^{1}/_{2}$X4=2**

17.	**अधोलिखित- वाक्येषु रेखाङ्कित-पदानां प्रसङ्गानुकूलं उचितार्थं चित्वा लिखत -** **(i)** स सव्येन **<u>पाणिना</u>** चक्रं गृहीतवान् । (क) वामेन (ख) हस्तेन (ग) जलेन (घ) पदेन (ii) काकस्य **<u>गात्रम्</u>** यदि काञ्चनस्य । (क) गोत्रम् (ख) कुटुंबम् (ग) शरीरं (घ) नेत्रम् (iii) **<u>सपदि</u>** उपायः क्रियताम् । (क) एकपदेन (ख) संसारे (ग) पादेन सह (घ) झटिति (iv) क्रोधात् भवति **<u>सम्मोह</u>**: । (क) किंकर्तव्यविमूढता (ख) क्रोधः (ग) निर्धनता (घ) व्याकुलता	**1X4= 4**
18.	**मञ्जूषाप्रदत्तपदानां सहायतया रिक्तस्थानानि पूरयित्वा अधोलिखितकथाम् उत्तरपुस्तिकायां लिखत** - चन्द्रनामकस्य राजपुत्राः राजगृहे(i)..... पालयन्ति स्म। तस्मिन् राजगृहे बालवाहनयोग्यम् एकं मेषयूथम् अपि आसीत्। तेषु एकः(ii) .....मेषः अहर्निशं महानसम् प्रविश्य यत् पश्यति स्म तत् खादति स्म। अतः तेन सह सूपकाराणां (iii).....भवति स्म। मेषस्य सूपकाराणां च कलहं दृष्ट्वा वानराणां बुद्धिमान् यूथपतिः तान् अवदत् एतेषां कलहो वानराणां (iv).....भविष्यति । अतः वयम् राजभवनं त्यक्त्वा वनं(iv) .....। किन्तु (vi).....वानराः तस्य वचनम् अश्रद्धेये मत्वा वनं न अगच्छन् । एकदा सः उद्दण्डः मेषः (vii).....ज्वलितकाष्ठेन ताडितः। ऊर्णाप्रचुरः मेषः जाज्वल्यमानशरीरः निकटस्थाम् (viii).....प्राविशत् । **मदोद्धताः , कलहः , गच्छामः , वानरान् , सूपकारैः , अश्वशालां, विनाशकारणं , उद्दण्डः**	**$^{1}/_{2}$X8=4**